।। শ্রী য়ংত্রোদ্ধারক স্তুতিঃ ।।

নমামি দূতং রামস্য় ।
সুখদং চ সুরদ্রুমম ।
পীনবৃত্তমহাবাহুং ।
সর্বশত্রুনিবারণম ।। ১ ।।

নানারত্নসমায়ুক্ত ।
কুণ্ডলাদি বিরাজিতং ।
সর্বদাভীষ্টদাতারং ।
সতাং বৈ দৃঢমাহবে ।। ২ ।।

বাসিনং চক্রতীর্থস্য় ।
দক্ষিণস্থগিরৌসদা ।
তুংগাংবোধিতরংগস্য় ।
বাতেন পরিশোভিতে ।। ৩ ।।

নানাদেশাগতৈস্সদ্ভিঃ ।
সেব্য়মানং নৃপোত্তমৈঃ ।
ধূপ দীপাদি নৈবেদ্য়ৈঃ ।
পংচখাদ্য়ৈশ্চ শক্তিতঃ ।। ৪ ।।

ভজামি শ্রী হনূমংতম ।
হেমকাংতি সমপ্রভং ।
ব্য়াসতীর্থ য়তীংদ্রেণ ।

www.yousigma.com

পূজিতং প্রণিধানতঃ ।। ৫ ।।

ত্রিবারং য়ঃ পঠেন্নিত্য়ং ।
স্তোত্রং ভক্তাদ্বিজোত্তমঃ ।
বাংছিতং লভদেঽভীষ্টং ।
ষণ্মাসাভ্য়ংতরে খলু ।। ৬ ।।

পুত্রার্থির্লভতে পুত্রং ।
য়শার্থির্লভতে য়শঃ ।
বিদ্য়ার্থির্লভতে বিদ্য়াং ।
ধনার্থির্লভতে ধনং ।। ৭ ।।

সর্বথা মাস্তুসংদেহো ।
হরিঃসাক্ষী জগত্পতিঃ ।
য়ঃ করোত্য়ত্র সংদেহং ।
স য়াতি নরকং ধ্রুবম ।। ৮ ।।

www.yousigma.com